## द्वीपादनुसमुद्रं यञ् । (१०/१३८०)

समुद्रसमीपे यो द्वीपः, [1]तस्माद् यञ् प्रत्ययो भवति शैषिकः । [2]कच्छादिपाठात् अणो (४.२.१३३/१३५७), मनुष्यवुञः (४.२.१३४/१३५८) [3]चापवादः । द्वैप्यम् । [4]द्वैप्यं भवन्तोऽनुचरन्ति [5]चक्रम् । अनुसमुद्रम् इति किम्? [6]द्वैपकम् । द्वैपमन्यत् ॥

## कालाट् ठञ् । (११/१३८१)

कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः । अणोऽपवादः । वृद्धात् तु छं परत्वाद् बाधते । [7]मासिकः । [8]आर्धमासिकः । सांवत्सरिकः । यथाकथञ्चिद् [9]गुणवृत्त्यापि काले वर्तमानात् [10]प्रत्यय इष्यते । कादम्बपुष्पिकम् । [11]व्रैहिपलालिकम् । 'तत्र जातः' (४.३.२५/१३९३) इति [12]प्रागतः कालाधिकारः ॥

## श्राद्धे शरदः । (१२/१३८२)

शरच्छब्दात् ठञ् प्रत्ययो भवति श्राद्धेऽभिधेये शैषिकः । ऋत्वणः (४.३.१६/१३८७) अपवादः । [13]श्राद्धे इति च कर्म गृह्यते, न श्रद्धावान् पुरुषः, अनभिधानात् । शारदिकं श्राद्धम् । शारदम् अन्यत् ॥

## विभाषा रोगातपयोः । (१३/१३८३)

शरदः इत्येव । रोगे आतपे चाभिधेये शरच्छब्दात् ठञ् प्रत्ययो [14]वा भवति शैषिकः । ऋत्वणोऽपवादः । शारदिको रोगः । शारदिकः आतपः । [15]शारदो रोगः । शारदः आतपः । रोगातपयोः इति किम्? शारदं दधि ॥

## निशाप्रदोषाभ्यां च । (१४/१३८४)

निशाप्रदोषशब्दाभ्यां [16]च विभाषा ठञ् प्रत्ययो भवति शैषिकः । 'कालाट् [17]ठञ्' (४.३.११/१३८१) इति नित्ये [18]ठञि प्राप्ते विकल्प उच्यते । नैशिकम्, नैशम् । प्रादोषिकम्, प्रादोषम् ॥

## श्वसस्तुट् च । (१५/१३८५)

विभाषा इत्येव । श्वःशब्दाद् [19]विभाषा ठञ् प्रत्ययो भवति,[20] तस्य च तुडागमो भवति । त्यप्-प्रत्ययोऽप्यतो [21]विहितः, 'ऐषमोह्यः श्वसोऽन्यतरस्याम्' (४.२.१०५/१३२६) इति । एताभ्यां मुक्ते टयुट्युलावपि भवतः । [22]शौवस्तिकः, श्वस्त्यः, श्वस्तनः ॥

---

1. तद्विषयात् द्वीपशब्दात् ब.ड.फ.ह. 2. कच्छादिषु ब.क.फ.ह. 3. च बाधकः फ. 4. द्वैप्याः ब.क.ड, द्वैप्यानुदन्तो ह. 5. चक्रम् नास्ति क. 6. द्वैपः क, नास्ति ड.फ. 7. मासिकम्, आर्धमासिकम्, सांवत्सरिकम् ह.फ. 8. नास्ति ड. 9. गौणवृत्त्याऽपि फ, गुणवृत्त्यातिकालवर्तमानात् क. 10. प्रातिपदिकात् इत्यधिकम् फ. 11 व्रैहिपलालकम् क. 12. प्राक् नास्ति फ. 13. श्राद्धम् ब. 14. विभाषा फ, वा नास्ति ब. 15. शारदो रोगः नास्ति ब, शारदः फ. 16. च नास्ति फ. 17. ठञ् नास्ति फ. 18. ठञि नास्ति ब. इ. 19. विभाषया ब. 20. शैषिकः इत्यधिकम् फ. 21. प्राप्यः फ. 22. शौवस्तिकम् श्वस्त्यम् श्वस्तनम् फ. ह.